# Shri Tara Takaradi Sahasranamastotram

# શ્રીતારાતકારાદિસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : tArAtakArAdisahasranAmastotra

File name : tArAtakArAdisahasranAmastotra.itx

Category : sahasranAma, devii, dashamahAvidyA, stotra, devI

Location : doc_devii

Transliterated by : Muktabodha.org

Proofread by : Muktabodha.org, DPD

Description-comments : From Shaktapramoda kAlyAdidashamahAvidyAtantrAtmakaH

Acknowledge-Permission: Marjorie Woollacott, Ph.D., Digital Library Coordinator muktabodha.org

Latest update : July 31, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીતારાતકારાદિસહસ્રનામસ્તોત્રમ્

અથ શ્રીતારાતકારાદિસહસ્રનામસ્તોત્રમ્ ।
વસિષ્ઠ ઉવાચ -
નામ્નાં સહસ્રન્તારાયા મુખામ્ભોજાદ્વિનિર્ગતમ્ ।
મન્ત્રસિદ્ધિકરમ્પ્રોક્તન્તન્મે વદ પિતામહ ॥ ૧॥

બ્રહ્મોવાચ -
શૃણુ વત્સ પ્રવક્ષ્યામિ રહસ્યં સર્વસિદ્ધિદમ્ ।
યસ્યોપદેશમાત્રેણ તવ સિદ્ધિર્ભવિષ્યતિ ॥ ૨॥

મહાપ્રલયકાલાદૌ નષ્ટે સ્થાવરજઙ્ગમે ।
મહાકારં સમાકર્ણ્ય કૃપયા સંહૃતન્તનૌ ॥ ૩॥

નામ્ના તેન મહાતારા ખ્યાતા સા બ્રહ્મરૂપિણી ।
મહાશૂલત્રયઙ્કૃત્વા તત્ર ચૈકાકિની સ્થિતા ॥ ૪॥

પુનઃ સૃષ્ટેશ્ચિકીર્ષાભૂદ્દિવ્યસામ્રાજ્યસઞ્જ્ઞકમ્ ।
નામ્નાં સહસ્રમસ્યાસ્તુ તકારાદ્યં મયા સ્મૃતમ્ ॥ ૫॥

તત્પ્રભાવેણ બ્રહ્માણ્ડન્નિર્મિતં સુદૃઢં મહત્ ।
આવિર્ભૂતા વયન્તત્ર યન્ત્રૈસ્તસ્યાઃ પુરા દ્વિજ ॥ ૬॥

સ્વસ્ય કાર્યાર્થિનસ્તત્ર ભ્રાન્તા ભૂમ્યાયથા વયમ્ ।
તયોપદિષ્ટાઃ કૃપયા ભવામસ્સૃષ્ટિકારકાઃ ॥ ૭॥

તસ્યાઃ પ્રસાદાદ્વિપ્રેન્દ્ર ત્રયો બ્રહ્માણ્ડનાયકાઃ ।
અન્યે સુરગણાસ્સર્વે તસ્યાઃ પાદપ્રસેવકાઃ ॥ ૮॥

પઠનાદ્ધારણાત્સૃષ્ટેઃ કર્તાહમ્પાલકો હરિઃ ।
તત્ત્વાક્ષરોપદેશેન સંહર્તા શઙ્કરસ્સ્વયમ્ ॥ ૯॥

ઋષિચ્છન્દાદિકધ્યાનં મૂલવત્પરિકીર્તિતમ્ ।

નિયોગોમાત્રસિદ્ધૌ ચ પુરુષાર્થચતુષ્ટયે ॥ ૧૦॥

તારા તારાદિપઞ્ચાર્ણા તારાન્યાવેદવીર્યજા ।
તારાતારહિતાવર્ણા તારાદ્યા તારરૂપિણી ॥ ૧૧॥

તારારાત્રિસમુત્પન્ના તારારાત્રિવરોદ્યતા ।
તારારાત્રિજપાસક્તા તારારાત્રિસ્વરૂપિણી ॥ ૧૨॥

તારારાજ્ઞીસ્વસન્તુષ્ટા તારારાજ્ઞીવરપ્રદા ।
તારારાજ્ઞીસ્વરૂપા ચ તારારાજ્ઞીપ્રસિદ્ધિદા ॥ ૧૩॥

તારાહૃત્પઙ્કજાગારા તારાહૃત્પઙ્કજાપરા ।
તારાહૃત્પઙ્કજાધારા તારાહૃત્પઙ્કજા તથા ॥ ૧૪॥

તારેશ્વરી ચ તારાભા તારાગણસ્વરૂપિણી ।
તારાગણસમાકીર્ણા તારાગણનિષેવિતા ॥ ૧૫॥

તારા તારાન્વિતા તારા રત્નાન્વિતવિભૂષણા ।
તારાગણરણાસન્ના તારાકૃત્યપ્રપૂજિતા ॥ ૧૬॥

તારાગણકૃતાહારા તારાગણકૃતાશ્રયા ।
તારાગણકૃતાગારા તારાગણનતત્પરા ॥ ૧૭॥

તારાગુણગણાકીર્ણા તારાગુણગણપ્રદા ।
તારાગુણગણાસક્તા તારાગુણગણાલયા ॥ ૧૮॥

તારેશ્વરી તારપૂજ્યા તારાજપ્યા તુ તારણા ।
તારમુખ્યા તુ તારાખ્યા તારદક્ષા તુ તારિણી ॥ ૧૯॥

તારાગમ્યા તુ તારસ્થા તારામૃતતરઙ્ગિણી ।
તારભવ્યા તુ તારાર્ણા તારહવ્યા તુ તારિણી ॥ ૨૦॥

તારકા તારકાન્તસ્સ્થા તારકારાશિભૂષણા ।
તારકાહારશોભાઢ્યા તારકાવેષ્ટિતાઙ્ગણા ॥ ૨૧॥

તારકાહંસકાકીર્ણા તારકાકૃતભૂષણા ।
તારકાઙ્ગદશોભાઙ્ગી તારકાશ્રિતકઙ્કણા ॥ ૨૨॥

તારકાઞ્ચિતકાઞ્ચી ચ તારકાન્વિતભક્ષણા ।
તારકાચિત્રવસના તારકાસનમણ્ડલા ॥ ૨૩॥

તારકાકીર્ણમુકુટા તારકાશ્રિતકુણ્ડલા ।
તારકાન્વિતતાટઙ્કયુગ્મગણ્ડસ્થલોજ્જ્વલા ॥ ૨૪॥

તારકાશ્રિતપાદાબ્જા તારકાવરદાયિકા ।
તારકાદત્તહૃદયા તારકાઞ્ચિતસાયકા ॥ ૨૫॥

તારકાન્યાસકુશલા તારકાન્યાસવિગ્રહા ।
તારકાન્યાસસન્તુષ્ટા તારકાન્યાસસિદ્ધિદા ॥ ૨૬॥

તારકાન્યાસનિલયા તારકાન્યાસપૂજિતા ।
તારકાન્યાસસંહૃષ્ટા તારકાન્યાસસિદ્ધિદા ॥ ૨૭॥

તારકાન્યાસસંમગ્ના તારકાન્યાસવાસિની ।
તારકાન્યાસસમ્પૂર્ણમન્ત્રસિદ્ધિવિધાયિની ॥ ૨૮॥

તારકોપાસકપ્રાણા તારકોપાસકપ્રિયા ।
તારકોપાસકાસાધ્યા તારકોપાસકેષ્ટદા ॥ ૨૯॥

તારકોપાસકાસક્તા તારકોપાસકાર્થિની ।
તારકોપાસકારાધ્યા તારકોપાસકાશ્રયા ॥ ૩૦॥

તારકાસુરસન્તુષ્ટા તારકાસુરપૂજિતા ।
તારકાસુરનિર્માણકર્ત્રી તારકવન્દિતા ॥ ૩૧॥

તારકાસુરસમ્માન્યા તારકાસુરમાનદા ।
તારકાસુરસંસિદ્ધા તારકાસુરદેવતા ॥ ૩૨॥

તારકાસુરદેહસ્થા તારકાસુરસ્વર્ગદા ।
તારકાસુરસંસૃષ્ટા તારકાસુરગર્વદા ॥ ૩૩॥

તારકાસુરસંહન્ત્રી તારકાસુરમર્દિની ।
તારકાસુરસઙ્ગ્રામનર્તકી તારકાપહા ॥ ૩૪॥

તારકાસુરસઙ્ગ્રામકારિણી તારકારિભૃત્ ।
તારકાસુરસઙ્ગ્રામકબન્ધવૃન્દવન્દિતા ॥ ૩૫॥

તારકારિપ્રસૂતારિકારિમાતા તુ કારિકા ।
તારકારીમનોહારીવસ્ત્રભૂષાનુશાસિકા ॥ ૩૬॥

તારકારીવિધાત્રી ચ તારકારિનિષેવિતા ।
તારકારીવચસ્તુષ્ટા તારકારીસુશિક્ષિતા ॥ ૩૭॥

તારકારીસુસન્તુષ્ટા તારકારિવિભૂષિતા ।
તારકારિકૃતોત્સઙ્ગી તારકારિપ્રહર્ષદા ॥ ૩૮॥

તમઃ સમ્પૂર્ણસર્વાઙ્ગી તમોલિપ્તકલેવરા ।
તમોવ્યાપ્તસ્થલાસઙ્ગા તમઃ પટલસન્નિભા ॥ ૩૯॥

તમોહન્ત્રી તમઃ કર્ત્રી તમઃસઞ્ચારકારિણી ।
તમોગાત્રી તમોદાત્રી તમઃ પાત્રી તમોપહા ॥ ૪૦॥

તમોરાશિપૂર્ણરાશિસ્તમોરાશિવિનાશિની ।
તમોરાશિકૃતધ્વંસી તમોરાશિભયઙ્કરી ॥ ૪૧॥

તમોગુણપ્રસન્નાસ્યા તમોગુણસુસિદ્ધિદા ।
તમોગુણોક્તમાર્ગસ્થા તમોગુણવિરાજિતા ॥ ૪૨॥

તમોગુણસ્તુતિપરા તમોગુણવિવર્ધિની ।
તમોગુણાશ્રિતપરા તમોગુણવિનાશિની ॥ ૪૩॥

તમોગુણાક્ષયકરી તમોગુણકલેવરા ।
તમોગુણધ્વંસતુષ્ટા તમઃ પારેપ્રતિષ્ઠિતા ॥ ૪૪॥

તમોભવભવપ્રીતા તમોભવભવપ્રિયા ।
તમોભવભવાશ્રદ્ધા તમોભવભવાશ્રયા ॥ ૪૫॥

તમોભવભવપ્રાણા તમોભવભવાર્ચિતા ।
તમોભવભવપ્રીત્યાલીઢકુમ્ભસ્થલસ્થિતા ॥ ૪૬॥

તપસ્વિવૃન્દસન્તુષ્ટા તપસ્વિવૃન્દપુષ્ટિદા ।
તપસ્વિવૃન્દસંસ્તુત્યા તપસ્વિવૃન્દવન્દિતા ॥ ૪૭॥

તપસ્વિવૃન્દસમ્પન્ના તપસ્વિવૃન્દહર્ષદા ।
તપસ્વિવૃન્દસમ્પૂજ્યા તપસ્વિવૃન્દભૂષિતા ॥ ૪૮॥

તપસ્વિચિત્તતલ્પસ્થા તપસ્વિચિત્તમધ્યગા ।
તપસ્વિચિત્તચિત્તાર્હા તપસ્વિચિત્તહારિણી ॥ ૪૯॥

તપસ્વિકલ્પવલ્લ્યાભા તપસ્વિકલ્પપાદપી ।
તપસ્વિકામધેનુશ્ચ તપસ્વિકામપૂર્તિદા ॥ ૫૦॥

તપસ્વિત્રાણનિરતા તપસ્વિગૃહસંસ્થિતા ।

તપસ્વિગૃહરાજશ્રીસ્તપસ્વિરાજ્યદાયિકા ॥ ૫૧॥

તપસ્વિમાનસારાધ્યા તપસ્વિમાનદાયિકા ।
તપસ્વિતાપસંહર્ત્રી તપસ્વિતાપશાન્તિકૃત્ ॥ ૫૨॥

તપસ્વિસિદ્ધિવિદ્યા ચ તપસ્વિમન્ત્રસિદ્ધિકૃત્ ।
તપસ્વિમન્ત્રતન્ત્રેશી તપસ્વિમન્ત્રરૂપિણી ॥ ૫૩॥

તપસ્વિમન્ત્રનિપુણા તપસ્વિકર્મકારિણી ।
તપસ્વિકર્મસમ્ભૂતા તપસ્વિકર્મસાક્ષિણી ॥ ૫૪॥

તપસ્સેવ્યા તપોભવ્યા તપોભાવ્યા તપસ્વિની ।
તપોવશ્યા તપોગમ્યા તપોગેહનિવાસિની ॥ ૫૫॥

તપોધન્યા તપોમાન્યા તપઃ કન્યા તપોવૃતા ।
તપસ્તથ્યા તપોગોપ્યા તપોજપ્યા તપોનૃતા ॥ ૫૬॥

તપસ્સાધ્યા તપોરાધ્યા તપોવન્દ્યા તપોમયી ।
તપસ્સન્ધ્યા તપોવન્ધ્યા તપસ્સાન્નિધ્યકારિણી ॥ ૫૭॥

તપોધ્યેયા તપોગેયા તપસ્તમ્રા તપોબલા ।
તપોલેયા તપોદેયા તપસ્તત્ત્વફલપ્રદા ॥ ૫૮॥

તપોવિઘ્નવરઘ્ની ચ તપોવિઘ્નવિનાશિની ।
તપોવિઘ્નચયધ્વંસી તપોવિઘ્નભયઙ્કરી ॥ ૫૯॥

તપોભૂમિવરપ્રાણા તપોભૂમિપતિસ્તુતા ।
તપોભૂમિપતિધ્યેયા તપોભૂમિપતીષ્ટદા ॥ ૬૦॥

તપોવનકુરઙ્ગસ્થા તપોવનવિનાશિની ।
તપોવનગતિપ્રીતા તપોવનવિહારિણી ॥ ૬૧॥

તપોવનફલાસક્તા તપોવનફલપ્રદા ।
તપોવનસુસાધ્યા ચ તપોવનસુસિદ્ધિદા ॥ ૬૨॥

તપોવનસુસેવ્યા ચ તપોવનનિવાસિની ।
તપોધનસુસંસેવ્યા તપોધનસુસાધિતા ॥ ૬૩॥

તપોધનસુસઁલીના તપોધનમનોમયી ।
તપોધનનમસ્કારા તપોધનવિમુક્તિદા ॥ ૬૪॥

તપોધનધનાસાધ્યા તપોધનધનાત્મિકા ।
તપોધનધનારાધ્યા તપોધનફલપ્રદા ॥ ૬૫॥

તપોધનધનાઢ્યા ચ તપોધનધનેશ્વરી ।
તપોધનધનપ્રીતા તપોધનધનાલયા ॥ ૬૬॥

તપોધનજનાકીર્ણા તપોધનજનાશ્રયા ।
તપોધનજનારાધ્યા તપોધનજનપ્રસૂઃ ॥ ૬૭॥

તપોધનજનપ્રાણા તપોધનજનેષ્ટદા ।
તપોધનજનાસાધ્યા તપોધનજનેશ્વરી ॥ ૬૮॥

તરુણાસૃક્પ્રપાનાર્તા તરુણાસૃક્પ્રતર્પિતા ।
તરુણાસૃક્સમુદ્રસ્થા તરુણાસૃક્પ્રહર્ષદા ॥ ૬૯॥

તરુણાસૃક્સુસન્તુષ્ટા તરુણાસૃગ્વિલેપિતા ।
તરુણાસૃઙ્નદીપ્રાણા તરુણાસૃગ્વિભૂષણા ॥ ૭૦॥

તરુણૈણબલિપ્રીતા તરુણૈણબલિપ્રિયા ।
તરુણૈણવલિપ્રાણા તરુણૈણબલીષ્ટદા ॥ ૭૧॥

તરુણાજબલિપ્રીતા તરુણાજબલિપ્રિયા ।
તરુણાજબલિઘ્રાણા તરુણાજબલિપ્રભુક્ ॥ ૭૨॥

તરુણાદિત્યસઙ્કાશા તરુણાદિત્યવિગ્રહા ।
તરુણાદિત્યરુચિરા તરુણાદિત્યનિર્મલા ॥ ૭૩॥

તરુણાદિત્યનિલયા તરુણાદિત્યમણ્ડલા ।
તરુણાદિત્યલલિતા તરુણાદિત્યકુણ્ડલા ॥ ૭૪॥

તરુણાર્કસમજ્યોત્સ્ના તરુણાર્કસમપ્રભા ।
તરુણાર્કપ્રતીકારા તરુણાર્કપ્રવર્ધિતા ॥ ૭૫॥

તરુણા તરુણાનેત્રા ચ તરુણા તરુણલોચના ।
તરુણા તરુણનેત્રા ચ તરુણા તરુણભૂષણા ॥ ૭૬॥

તરુણીદત્તસઙ્કેતા તરુણીદત્તભૂષણા ।
તરુણીગણસન્તુષ્ટા તરુણીતરુણીમણિઃ ॥ ૭૭॥

તરુણીમણિસંસેવ્યા તરુણીમણિવન્દિતા ।
તરુણીમણિસન્તુષ્ટા તરુણીમણિપૂજિતા ॥ ૭૮॥

તરુણીવૃન્દસંવાદ્યા તરુણીવૃન્દવન્દિતા ।
તરુણીવૃન્દસંસ્તુત્યા તરુણીવૃન્દમાનદા ॥ ૭૯॥

તરુણીવૃન્દમધ્યસ્થા તરુણીવૃન્દવેષ્ટિતા ।
તરુણીવૃન્દસમ્પ્રીતા તરુણીવૃન્દભૂષિતા ॥ ૮૦॥

તરુણીજપસંસિદ્ધા તરુણીજપમોક્ષદા ।
તરુણીપૂજકાસક્તા તરુણીપૂજકાર્થિની ॥ ૮૧॥

તરુણીપૂજકશ્રીદા તરુણીપૂજકાર્ત્તિહા ।
તરુણીપૂજકપ્રાણા તરુણીનિન્દકાર્ત્તિદા ॥ ૮૨॥

તરુણીકોટિનિલયા તરુણીકોટિવિગ્રહા ।
તરુણીકોટિમધ્યસ્થા તરુણીકોટિવેષ્ટિતા ॥ ૮૩॥

તરુણીકોટિદુસ્સાધ્યા તરુણીકોટિવિગ્રહા ।
તરુણીકોટિરુચિરા તરુણીતરુણીશ્વરી ॥ ૮૪॥

તરુણીમણિહારાઢ્યા તરુણીમણિકુણ્ડલા ।
તરુણીમણિસન્તુષ્ટા તરુણીમણિમણ્ડિતા ॥ ૮૫॥

તરુણીસરણીપ્રીતા તરુણીસરણીરતા ।
તરુણીસરણીસ્થાના તરુણીસરણીરતા ॥ ૮૬॥

તરણીમણ્ડલશ્રીદા તરણીમણ્ડલેશ્વરી ।
તરણીમણ્ડલશ્રદ્ધા તરણીમણ્ડલસ્થિતા ॥ ૮૭॥

તરણીમણ્ડલાર્ઘાઢ્યા તરણીમણ્ડલાર્ચિતા ।
તરણીમણ્ડલધ્યેયા તરણીભવસાગરા ॥ ૮૮॥

તરણીકારણાસક્તા તરણીતક્ષકાર્ચિતા ।
તરણીતક્ષકશ્રીદા તરણીતક્ષકાર્થિની ॥ ૮૯॥

તરણીતરણશીલા ચ તરીતરણતારિણી ।
તરીતરણસંવેદ્યા તરીતરણકારિણી ॥ ૯૦॥

તરુરૂપા તરૂપસ્થા તરુસ્તરુલતામયી ।
તરુરૂપા તરુસ્થા ચ તરુમધ્યનિવાસિની ॥ ૯૧॥

તપ્તકાઞ્ચનગેહસ્થા તપ્તકાઞ્ચનભૂમિકા ।

તપ્તકાઞ્ચનપ્રાકારા તપ્તકાઞ્ચનપાદુકા ॥ ૯૨॥

તપ્તકાઞ્ચનદીમાઙ્ગી તપ્તકાઞ્ચનસન્નિભા ।
તપ્તકાઞ્ચનગૌરાઙ્ગી તપ્તકાઞ્ચનમઞ્ચગા ॥ ૯૩॥

તપ્તકાઞ્ચનવસ્ત્રાઢ્યા તપ્તકાઞ્ચનરૂપિણી ।
તપ્તકાઞ્ચનમધ્યસ્થા તપ્તકાઞ્ચનકારિણી ॥ ૯૪॥

તપ્તકાઞ્ચનમાસાર્ચ્યા તપ્તકાઞ્ચનપાત્રભુક્ ।
તપ્તકાઞ્ચનશૈલસ્થા તપ્તકાઞ્ચનકુણ્ડલા ॥ ૯૫॥

તપ્તકાઞ્ચનક્ષત્ત્રાઢ્યા તપ્તકાઞ્ચનદણ્ડધૃક્ ।
તપ્તકાઞ્ચનભૂષાઢ્યા તપ્તકાઞ્ચનદાનદા ॥ ૯૬॥

તપ્તકાઞ્ચનદેશેશી તપ્તકાઞ્ચનચાપધૃક્ ।
તપ્તકાઞ્ચનતૂણાઢ્યા તપ્તકાઞ્ચનબાણભૃત્ ॥ ૯૭॥

તલાતલવિધાત્રી ચ તલાતલવિધાયિની ।
તલાતલસ્વરૂપેશી તલાતલવિહારિણી ॥ ૯૮॥

તલાતલજનાસાધ્યા તલાતલજનેશ્વરી ।
તલાતલજનારાધ્યા તલાતલજનાર્થદા ॥ ૯૯॥

તલાતલજયાભાક્ષી તલાતલજચઞ્ચલા ।
તલાતલજરત્નાઢ્યા તલાતલજદેવતા ॥ ૧૦૦॥

તટિનીસ્થાનરસિકા તટિની તટવાસિની ।
તટિની તટિનીતીરગામિની તટિનીપ્રિયા ॥ ૧૦૧॥

તટિનીપ્લવનપ્રીતા તટિનીપ્લવનોદ્યતા ।
તટિનીપ્લવનશ્લાધ્યા તટિનીપ્લવનાર્થદા ॥ ૧૦૨॥

તટલાસ્થા તટસ્થાના તટેશી તટવાસિની ।
તટપૂજ્યા તટારાધ્યા તટરોમમુખાર્થિની ॥ ૧૦૩॥

તટજા તટરૂપા ચ તટસ્થા તટચઞ્ચલા ।
તટસન્નિધિગેહસ્થાસહિતા તટશાયિની ॥ ૧૦૪॥

તરઙ્ગિણી તરઙ્ગાભા તરઙ્ગાયતલોચના ।
તરઙ્ગસમદુર્દ્ધર્ષા તરઙ્ગસમચઞ્ચલા ॥ ૧૦૫॥

તરઙ્ગસમદીર્ઘાઙ્ગી તરઙ્ગસમવર્ધિતા ।
તરઙ્ગસમસँવૃદ્ધિસ્તરઙ્ગસમનિર્મલા ॥ ૧૦૬॥

તડાગમધ્યનિલયા તડાગમધ્યાસમ્ભવા ।
ગડાગરચનશ્લાધ્યા તડાગરચનોદ્યતા ॥ ૧૦૭॥

તડાગકુસુદામોદી તડાગેશી તડાગિની ।
તડાગનીરસંસ્નાતા  તડાગનીરનિર્મલા ॥ ૧૦૮॥

તડાગકમલાગારા તડાગકમલાલયા ।
તડાગકમલાન્તસ્સ્થા તડાગકમલોદ્યતા ॥ ૧૦૯॥

તડાગકમલાઙ્ગી ચ તડાગકમલાનના ।
તડાગકમલપ્રાણા તડાગકમલેક્ષણા ॥ ૧૧૦॥

તડાગરક્તપદ્મસ્થા તડાગશ્વેતપદ્મગા ।
તડાગનીલપદ્માભા તડાગનીલપદ્મભૃત્ ॥ ૧૧૧॥

તનુસ્તનુગતા તન્વી તન્વઙ્ગી તનુધારિણી ।
તનુરૂપા તનુગતા તનુધૃક્ તનુરૂપિણી ॥ ૧૧૨॥

તનુસ્થા તનુમધ્યાઙ્ગી તનુકૃત્તનુમઙ્ગલા ।
તનુસેવ્યા તુ તનુજા તનુજાતનુસમ્ભવા ॥ ૧૧૩॥

તનુભૃત્તનુસમ્ભૂતા તનુદાતનુકારિણી ।
તનુભૃત્તનુસંહન્ત્રી તનુસઞ્ચારકારિણી ॥ ૧૧૪॥

તથ્યવાક્ તથ્યવચના તથ્યકૃત્ તથ્યવાદિની ।
તથ્યભૃત્તથ્યચરિતા તથ્યધર્માનુવર્ત્તિની ॥ ૧૧૫॥

તથ્યભુક્ તથ્યગમના તથ્યભક્તિવરપ્રદા ।
તથ્યનીચેશ્વરી તથ્યચિત્તાચારાશુસિદ્ધિદા ॥ ૧૧૬॥

તર્ક્યાતર્ક્યસ્વભાવા ચ તર્કદાયા તુ તર્કકૃત્ ।
તર્કાધ્યાપનમધ્યસ્થા તર્કાધ્યાપનકારિણી ॥ ૧૧૭॥

તર્કાધ્યાપનસન્તુષ્ટા તર્કાધ્યાપનરૂપિણી ।
તર્કાધ્યાપનસંશીલા તર્કાર્થપ્રતિપાદિતા ॥ ૧૧૮॥

તર્કાધ્યાપનસન્તૃપ્તા તર્કાર્થપ્રતિપાદિકા ।
તર્કવાદાશ્રિતપદા તર્કવાદવિવર્ધિની ॥ ૧૧૯॥

તર્કવાદૈકનિપુણા તર્કવાદપ્રચારિણી ।
તમાલદલશ્યામાઙ્ગી તમાલદલમાલિની ॥ ૧૨૦॥

તમાલવનસઙ્કેતા તમાલપુષ્પપૂજિતા ।
તગરી તગરારાધ્યા તગરાર્ચિતપાદુકા ॥ ૧૨૧॥

તગરસ્રક્સુસન્તુષ્ટા તગરસ્રગ્વિરાજિતા ।
તગરાહુતિસન્તુષ્ટા તગરાહુતિકીર્તિદા ॥ ૧૨૨॥

તગરાહુતિસંસિદ્ધા તગરાહુતિમાનદા ।
તડિત્તડિલ્લતાકારા તડિચ્ચઞ્ચલલોચના ॥ ૧૨૩॥

તડિલ્લતા તડિત્તન્વી તડિદ્દીપ્રા તડિત્પ્રભા ।
તદ્રૂપા તત્સ્વરૂપેશી તન્મયી તત્ત્વરૂપિણી ॥ ૧૨૪॥

તત્સ્થાનદાનનિરતા તત્કર્મફલદાયિની ।
તત્ત્વકૃત્ તત્ત્વદા તત્ત્વા તત્ત્વવિત્ તત્ત્વતર્પિતા ॥ ૧૨૫॥

તત્ત્વાર્ચ્ચ્યા તત્ત્વપૂજા ચ તત્ત્વાર્ઘ્યા તત્ત્વરૂપિણી ।
તત્ત્વજ્ઞાનપ્રદાનેશી તત્ત્વજ્ઞાનસુમોક્ષદા ॥ ૧૨૬॥

ત્વરિતા ત્વરિતપ્રીતા ત્વરિતાર્ત્તિવિનાશિની ।
ત્વરિતાસવસન્તુષ્ટા ત્વરિતાસવતર્પિતા ॥ ૧૨૭॥

ત્વગ્વસ્ત્રા ત્વક્પરીધાના તરલા તરલેક્ષણા ।
તરક્ષુચર્મવસના તરક્ષુત્વગ્વિભૂષણા ॥ ૧૨૮॥

તરક્ષુસ્તરક્ષુપ્રાણા તરક્ષુપૃષ્ઠગામિની ।
તરક્ષુપૃષ્ઠસંસ્થાના તરક્ષુપૃષ્ઠવાસિની ॥ ૧૨૯॥

તર્પિતોદૈસ્તર્પણાશા તર્પણાસક્તમાનસા ।
તર્પણાનન્દહૃદયા તર્પણાધિપતિસ્તતિઃ ॥ ૧૩૦॥

ત્રયીમયી ત્રયીસેવ્યા ત્રયીપૂજ્યા ત્રયીકથા ।
ત્રયીભવ્યા ત્રયીભાવ્યા ત્રયીભાવ્યા ત્રયીયુતા ॥ ૧૩૧॥

ત્ર્યક્ષરી ત્ર્યક્ષરેશાની ત્ર્યક્ષરીશીઘ્રસિદ્ધિદા ।
ત્ર્યક્ષરેશી ત્ર્યક્ષરીસ્થા ત્ર્યક્ષરીપુરુષાપદા ॥ ૧૩૨॥

તપના તપનેષ્ટા ચ તપસ્તપનકન્યકા ।

તપનાંશુસમાસહ્યા તપનકોટિકાન્તિકૃત્ ॥ ૧૩૩॥

તપનીયા તલ્પતલ્પગતા તલ્પવિધાયિની ।
તલ્પકૃત્તલ્પગા તલ્પદાત્રી તલ્પતલાશ્રયા ॥ ૧૩૪॥

તપનીયતલારાત્રી તપનીયાંશુપ્રાર્થિની ।
તપનીયપ્રદાતપ્રા તપનીયાદ્રિસંસ્થિતા ॥ ૧૩૫॥

તલ્પેશી તલ્પદા તલ્પસંસ્થિતા તલ્પવલ્લભા ।
તલ્પપ્રિયા તલ્પરતા તલ્પનિર્માણકારિણી ॥ ૧૩૬॥

તરસાપૂજનાસક્તા તરસાવરદાયિની ।
તરસાસિદ્ધિસન્ધાત્રી તરસામોક્ષદાયિની ॥ ૧૩૭॥

તાપસી તાપસારાધ્યા તાપસાર્ત્તિવિનાશની ।
તાપસાર્ત્તા તાપસશ્રીસ્તાપસપ્રિયવાદિની ॥ ૧૩૮॥

તાપસાનન્દહૃદયા તાપસાનન્દદાયિની ।
તાપસાશ્રિતપાદાબ્જા તાપસક્તમાનસા ॥ ૧૩૯॥

તામસી તામસીપૂજ્યા તામસીપ્રણયોત્સુકા ।
તામસી તામસીસીતા તામસીશીઘ્રસિદ્ધિદા ॥ ૧૪૦॥

તાલેશી તાલભુક્તાલદાત્રી તાલોપમસ્તની ।
તાલવૃક્ષસ્થિતા તાલવૃક્ષજા તાલરૂપિણી ॥ ૧૪૧॥

તાર્ક્ષ્યા તાર્ક્ષ્યસમારૂઢા તાર્ક્ષ્યેશી તાર્ક્ષ્યપૂજિતા ।
તાર્ક્ષ્યેશ્વરી તાર્ક્ષ્યમાતા તાર્ક્ષ્યેશીવરદાયિની ॥ ૧૪૨॥

તાપી તુ તપિની તાપસંહન્ત્રી તાપનાશિની ।
તાપદાત્રી તાપકર્ત્રી તાપવિધ્વંસકારિણી ॥ ૧૪૩॥

ત્રાસકર્ત્રી ત્રાસદાત્રી ત્રાસહર્ત્રી ચ ત્રાસહા ।
ત્રાસિતા ત્રાસરહિતા ત્રાસનિર્મૂલકારિણી ॥ ૧૪૪॥

ત્રાણકૃત્ત્રાણસંશીલા તાનેશી તાનદાયિની ।
તાનગાનરતા તાનકારિણી તાનગાયિની ॥ ૧૪૫॥

તારુણ્યામૃતસમ્પૂર્ણા તારુણ્યામૃતવારિધિઃ ।
તારુણ્યામૃતસન્તુષ્ટા તારુણ્યામૃતતર્પિતા ॥ ૧૪૬॥

તારુણ્યામૃતપૂર્ણાઙ્ગી તારુણ્યામૃતવિગ્રહા ।
તારુણ્યગુણસમ્પન્ના તારુણ્યોક્તિવિશારદા ॥ ૧૪૭॥

તામ્બૂલી તામ્બુલેશાની તામ્બૂલચર્વણોદ્યતા ।
તામ્બૂલપૂરિતાસ્યા ચ તામ્બૂલારુણિતાધરા ॥ ૧૪૮॥

તાટઙ્કરત્નવિખ્યાતિસ્તાટઙ્કરત્નભૂષિણી ।
તાટઙ્કરત્નમધ્યસ્થા તાટઙ્કદ્વયભૂષિતા ॥ ૧૪૯॥

તિથીશા તિથિસમ્પૂજ્યા તિથિસ્થા તિથિરૂપિણી ।
ત્રિતિથિવાસિનીસેવ્યા તિથીશવરદાયિની ॥ ૧૫૦॥

તિલોત્તમાદિકારાધ્યા તિલોત્તમાદિકપ્રભા ।
તિલોત્તમા તિલપ્રક્ષા તિલારાધ્યા તિલાર્ચ્ચિતા ॥ ૧૫૧॥

પ્। ૧૪૪) તિલભુક્ તિલસન્દાત્રી તિલતુષ્ટા તિલાલયા ।
તલદા તિલસઙ્કાશા તિલતૈલવિધાયિની ॥ ૧૫૨॥

તિલતૈલોપલિમાઙ્ગી તિલતૈલસુગન્ધિની ।
તિલાજ્યહોમસન્તુષ્ટા તિલાજ્યહોમસિદ્ધિદા ॥ ૧૫૩॥

તિલપુષ્પાઞ્જલિપ્રીતા તિલપુષ્પાઞ્જલિપ્રિયા ।
તિલપુષ્પાઞ્જલિશ્રેષ્ઠા તિલપુષ્પાભનાશિની ॥ ૧૫૪॥

તિલકાશ્રિતસિન્દૂરા તિલકાઙ્કિતચન્દના ।
તિલકાહૃતકસ્તૂરી તિલકામોદમોહિની ॥ ૧૫૫॥

ત્રિગુણા રિગુણાકારા ત્રિગુણાન્વિતવિગ્રહા ।
ત્રિગુણાકારવિખ્યાતા ત્રિમૂર્ત્તિસ્ત્રિગુણાત્મિકા ॥ ૧૫૬॥

ત્રિશિરા ત્રિપુરેશાની ત્રિપુરા ત્રિપુરેશ્વરી ।
ત્રિપુરેશી ત્રિલોકસ્થા ત્રિપુરી ત્રિપુરામ્બિકા ॥ ૧૫૭॥

ત્રિપુરારિસમારાધ્યા ત્રિપુરારિવરપ્રદા ।
ત્રિપુરારિશિરોભૂષા ત્રિપુરારિવરપ્રદા  ॥ ૧૫૮॥

ત્રિપુરારીષ્ટસન્દાત્રી ત્રિપુરારીષ્ટદેવતા ।
ત્રિપુરારિકૃતાર્ધાઙ્ગી ત્રિપુરારિવિલાસિની ॥ ૧૫૯॥

ત્રિપુરાસુરસંહન્ત્રી ત્રિપુરાસુરમર્દિની ।
ત્રિપુરાસુરસંસેવ્યા ત્રિપુરાસુરવર્યયા ॥ ૧૬૦॥

ત્રિકુટા ત્રિકુટારાધ્યા ત્રિકૂટાર્ચ્ચિતવિગ્રહા ।
ત્રિકૂટાચલમધ્યથા ત્રિકૂટાચલવાસિની ॥ ૧૬૧॥

ત્રિકૂટાચલસઞ્જાતા ત્રિકૂટાચલનિર્ગતા ।
ત્રિજટા ત્રિજટેશાની ત્રિજટાવરદાયિની ॥ ૧૬૨॥

ત્રિનેત્રેશી ત્રિનેત્રા ચ ત્રિનેત્રવરવર્ણિની ।
ત્રિવલી ત્રિવલીયુક્તા ત્રિશૂલવરધારિણી ॥ ૧૬૩॥

ત્રિશૂલેશી ત્રિશૂલીશી ત્રિશૂલભૃત્ ત્રિશૂલિની ।
ત્રિમનુસ્ત્રિમનૂપાસ્યા ત્રિમનૂપાસકેશ્વરી ॥ ૧૬૪॥

ત્રિમનુજપસન્તુષ્ટા ત્રિમનુસ્તૂર્ણસિદ્ધિદા ।
ત્રિમનુપૂજનપ્રીતા ત્રિમનુધ્યાનમોક્ષદા ॥ ૧૬૫॥

ત્રિવિધા ત્રિવિધાભક્તિસ્ત્રિમતા ત્રિમતેશ્વરી ।
ત્રિભાવસ્થા ત્રિભાવેશી ત્રિભાવપરિપૂરિતા ॥ ૧૬૬॥

ત્રિતત્ત્વાત્મા ત્રિતત્ત્વેશી ત્રિતત્ત્વજ્ઞા ત્રિતત્ત્વધૃક્ ।
ત્રિતત્ત્વાચમનપ્રીતા ત્રિતત્ત્વાચમનેષ્ટદા ॥ ૧૬૭॥

ત્રિકોણસ્થા ત્રિકોણેશી ત્રિકોણચક્રવાસિની ।
ત્રિકોણચક્રમધ્યસ્થા ત્રિકોણબિન્દુરૂપિણી ॥ ૧૬૮॥

ત્રિકોણયન્ત્રસંસ્થાના ત્રિકોણયન્ત્રરૂપિણી ।
ત્રિકોણયન્ત્રસમ્પૂજ્યા ત્રિકોણયન્ત્રસિદ્ધિદા ॥ ૧૬૯॥

ત્રિવર્ણાઢ્યા ત્રિવર્ણેશી ત્રિવર્ણોપાસિરૂપિણી ।
ત્રિવર્ણસ્થા ત્રિવર્ણાઢ્યા ત્રિવર્ણવરદાયિની ॥ ૧૭૦॥

ત્રિવર્ણાદ્યા ત્રિવર્ણાર્ચ્ચ્યા ત્રિવર્ગફલદાયિની ।
ત્રિવર્ગાઢ્યા ત્રિવર્ગેશી ત્રિવર્ગાદ્યફલપ્રદા ॥ ૧૭૧॥

ત્રિસન્ધ્યાર્ચ્ચ્યા ત્રિસન્ધ્યેશી ત્રિસન્ધ્યારાધનેષ્ટદા ।
ત્રિસન્ધ્યાર્ચ્ચનસન્તુષ્ટા ત્રિસન્ધ્યાજપમોક્ષદા ॥ ૧૭૨॥

ત્રિપદારાધિતપદા ત્રિપદા ત્રિપદેશ્વરી ।
ત્રિપદાપ્રતિપાદ્યેશી ત્રિપદા પ્રતિપાદિકા ॥ ૧૭૩॥

ત્રિશક્તિશ્ચ ત્રિશક્તેશી ત્રિશક્તેષ્ટફલપ્રદા ।

ત્રિશક્ત્યેષ્ટા ત્રિશક્તીષ્ટા ત્રિશક્તિપરિવેષ્ટિતા ॥ ૧૭૪॥

ત્રિવેણી ચ ત્રિવેણીસ્ત્રી ત્રિવેણીમાધવાર્ચ્ચિતા ।
ત્રિવેણીજલસન્તુષ્ટા ત્રિવેણીસ્નાનપુણ્યદા ॥ ૧૭૫॥

ત્રિવેણીજલસંસ્નાતા ત્રિવેણીજલરૂપિણી ।
ત્રિવેણીજલપૂતાઙ્ગી ત્રિવેણીજલપૂજિતા ॥ ૧૭૬॥

ત્રિનાડીસ્થા ત્રિનાડીશી ત્રિનાડીમધ્યગામિની ।
ત્રિનાડીસન્ધ્યસઞ્ચ્રેયા ત્રિનાડી ચ ત્રિકોટિની ॥ ૧૭૭॥

ત્રિપઞ્ચાશત્ત્રિરેખા ચ ત્રિશક્તિપથગામિની ।
ત્રિપથસ્થા ત્રિલોકેશી ત્રિકોટિકુલમોક્ષદા ॥ ૧૭૮॥

ત્રિરામેશી ત્રિરામાર્ચ્ચ્યા ત્રિરામવરદાયિની ।
ત્રિદશાશ્રિતપાદાબ્જા ત્રિદશાલયચઞ્ચલા ॥ ૧૭૯॥

ત્રિદશા ત્રિદશપ્રાર્થ્યા ત્રિદશાશુવરપ્રદા ।
ત્રિદશૈશ્વર્યસમ્પન્ના ત્રિદશેશ્વરસેવિતા ॥ ૧૮૦॥

ત્રિયામાર્ચ્ચ્યા ત્રિયામેશી ત્રિયામાનન્તસિદ્ધિદા ।
ત્રિયામેશાધિકજ્યોત્સ્ના ત્રિયામેશાધિકાનના ॥ ૧૮૧॥

ત્રિયામાનાથવત્સૌમ્યા ત્રિયામાનાથભૂષણા ।
ત્રિયામાનાથલાવણ્યા-રત્નકોટ્યુિતાનના ॥ ૧૮૨॥

ત્રિકાલસ્થા ત્રિકાલજ્ઞા ત્રિકાલજ્ઞત્વકારિણી ।
ત્રિકાલેશી ત્રિકાલાર્ચ્ચ્યા ત્રિકાલજ્ઞત્વદાયિની ॥ ૧૮૩॥

તીરભુક્ તીરગા તીરસરિતા તીરવાસિની ।
તીરભુગ્દેશસઞ્જાતા તીરભુગ્દેશસંસ્થિતા ॥ ૧૮૪॥

તિગ્માતિગ્માંશુસઙ્કાશા તિગ્માંશુક્રોડસંસ્થિતા ।
તિગ્માંશુકોટિદીપ્તાઙ્ગી તિગ્માંશુકોટિવિગ્રહા ॥ ૧૮૫॥

તીક્ષ્ણા તીક્ષ્ણતરા તીક્ષ્ણમહિષાસુરમર્દિની ।
તીક્ષ્ણકર્ત્રિલસત્પાણિસ્તીક્ષ્ણાસિવરધારિણી ॥ ૧૮૬॥

તીવ્રા તીવ્રગતિસ્તીવ્રાસુરસઙ્ઘવિનાશિની ।
તીવ્રાષ્ટનાગાભરણા તીવ્રમુણ્ડવિભૂષણા ॥ ૧૮૭॥

તીર્થાત્મિકા તીર્થમયી તીર્થેશી તીર્થપૂજિતા ।
તીર્થરાજેશ્વરી તીર્થફલદા તીર્થદાનદા ॥ ૧૮૮॥

તુમુલી તુમુલપ્રાજ્ઞી તુમુલાસુરઘાતિની ।
તુમુલક્ષતજપ્રીતા તુમુલાઙ્ગણવર્ત્તકી ॥ ૧૮૯॥

તુરગી તુરગારૂઢા તુરઙ્ગપૃષ્ઠગામિની ।
તુરઙ્ગગમનાહ્લાદા તુરઙ્ગવેગગામિની ॥ ૧૯૦॥

તુરીયા તુલના તુલ્યા તુલ્યવૃત્તિસ્તુ તુલ્યકૃત્ ।
તુલનેશી તુલારાશિસ્તુલારાશી ત્વસૂક્ષ્મવિત્ ॥ ૧૯૧॥

તુમ્બિકા તુમ્બિકાપાત્રભોજના તુમ્બિકાર્થિની ।
તુલસી તુલસીવર્યા તુલજા તુલજેશ્વરી ॥ ૧૯૨॥

તુષાગ્નિવ્રતસન્તુષ્ટા તુષાગ્નિસ્તુષરાશિકૃત્ ।
તુષારકરશીતાઙ્ગી તુષારકરપૂર્ત્તિકૃત્ ॥ ૧૯૩॥

તુષારાદ્રિસ્તુષારાદ્રિસુતા તુહિનદીધિતિઃ ।
તુહિનાચલકન્યા ચ તુહિનાચલવાસિની ॥ ૧૯૪॥

તૂર્યવર્ગેશ્વરી તૂર્યવર્ગદા તૂર્યવેદદા ।
તૂર્યવર્યાત્મિકા તૂર્યતૂર્યેશ્વરસ્વરૂપિણી ॥ ૧૯૫॥

તુષ્ટિદા તુષ્ટિકૃત્ તુષ્ટિસ્તૂણીરદ્વયપૃષ્ઠધૃક્ ।
તુમ્બુરાજ્ઞાનસન્તુષ્ટા તુષ્ટસંસિદ્ધિદાયિની ॥ ૧૯૬॥

તૂર્ણરાજ્યપ્રદા તૂર્ણગદ્યદા તૂર્ણપદ્યદા ।
તૂર્ણપાણ્ડિત્યસન્દાત્રી તૂર્ણાપૂર્ણબલપ્રદા ॥ ૧૯૭॥

તૃતીયા ચ તૃતીયેશી તૃતીયાતિથિપૂજિતા ।
તૃતીયાચન્દ્રચૂડેશી તૃતીયાચન્દ્રભૂષણા ॥ ૧૯૮॥

તૃપ્તિસ્તૃપ્તિકરી તૃપ્તા તૃષ્ણા તૃષ્ણાવિવર્ધિની ।
તૃષ્ણાપૂર્ણકરી તૃષ્ણાનાશિની તૃષિતા તૃષા ॥ ૧૯૯॥

ત્રેતાસંસાધિતા ત્રેતા ત્રેતાયુગફલપ્રદા ।
ત્રૈલોક્યપૂજા ત્રૈલોક્યદાત્રી ત્રૈલોક્યસિદ્ધિદા ॥ ૨૦૦॥

ત્રૈલોક્યેશ્વરતાદાત્રી ત્રૈલોક્યપરમેશ્વરી ।
ત્રૈલોક્યમોહનેશાની ત્રૈલોક્યરાજ્યદાયિની ॥ ૨૦૧॥

તૈત્રિશાખેશ્વરી ત્રૈત્રીશાખા તૈત્રવિવેકદા ।
તોરણાન્વિતગેહસ્થા તોરણાસક્તમાનસા ॥ ૨૦૨॥

તોલકાસ્વર્ણસન્દાત્રી તૌલકાસ્વર્ણકઙ્કણા ।
તોમરાયુધરૂપા ચ તોમરાયુધધારિણી ॥ ૨૦૩॥

તૌર્યત્રિકેશ્વરી તૌર્યન્ત્રિકી તૌર્યન્ત્રિકોત્સુકી ।
તન્ત્રકૃત્તન્ત્રવત્સૂક્ષ્મા તન્ત્રમન્ત્રસ્વરૂપિણી ॥ ૨૦૪॥

તન્ત્રકૃત્તન્ત્રસમ્પૂજ્યા તન્ત્રેશી તન્ત્રસમ્મતા ।
તન્ત્રજ્ઞા તન્ત્રવિત્તન્ત્રસાધ્યા તન્ત્રસ્વરૂપિણી ॥ ૨૦૫॥

તન્ત્રસ્થા તન્ત્રજા તન્ત્રી તન્ત્રભૃત્તન્ત્રમન્ત્રદા ।
તન્ત્રાધ્યા તન્ત્રગા તન્ત્રા તન્ત્રાર્ચ્ચ્યા તત્રસિદ્ધિદા ॥ ૨૦૬॥

ઇતિ તે કથિતન્દિવ્યઙ્ક્રતુકોટિફલપ્રદમ્ ।
નામ્નાં સહસ્રન્તારાયાસ્તકારાદ્યં સુગોપિતમ્ ॥ ૨૦૭॥

દાનં યજ્ઞાસ્તપસ્તીર્થવ્રતઞ્ચાનશનાદિકમ્ ।
એકૈકનામજં પુણ્યં સન્ધ્યાતુર્ગદિતં મયા ॥ ૨૦૮॥

ગુરૌ દેવે તથા મન્ત્રે યસ્ય સ્યાન્નિશ્ચલા મતિઃ ।
તસ્યૈવ સ્તોત્રપાઠેઽસ્મિન્સમ્ભવેદધિકારિતા ॥ ૨૦૯॥

મહાચીનક્રમાભિન્નષોઢાન્યસ્તકલેવરઃ ।
ક્રમદીક્ષાન્વિતો મન્ત્રી પઠેદેતન્ન ચાન્યથા ॥ ૨૧૦॥

ગન્ધપુષ્પાદિભિર્દ્રવ્યૈર્મકારૈઃ પઞ્ચકૈર્દ્વિજઃ ।
સમ્પૂજ્ય તારાવિધિવત્પઠેદેતદનન્યધીઃ ॥ ૨૧૧॥

અષ્ટમ્યાઞ્ચ ચતુર્દશ્યા સઙ્ક્રાન્તૌ રવિવાસરે ।
શનિભૌમદિને રાત્રૌ ગ્રહણે ચન્દ્રસૂર્યયોઃ ॥ ૨૧૨॥

તારારાત્રૌ કાલરાત્રૌ મોહરાત્રૌ વિશેષતઃ ।
પઠનાન્મન્ત્રસિદ્ધિઃ સ્યાત્સર્વજ્ઞત્વમ્પ્રજાયતે ॥ ૨૧૩॥

શ્મશાને પ્રાન્તરે રમ્યે શૂન્યાગારે વિશેષતઃ ।
દેવાગારે ગિરૌ વાપિ સ્તવપારાયણઞ્ચરેત્ ॥ ૨૧૪॥

બ્રહ્મહત્યા સુરાપાનં સ્તેયં સ્ત્રીગમનાદિકમ્ ।

ગુરુતલ્પે તથા ચાન્યત્પાતકન્નશ્યતિ ધ્રુવમ્ ॥ ૨૧૫॥

લતામધ્યગતો મન્ત્રી શ્રદ્ધયા ચાર્ચ્ચયેદ્યદિ ।
આકર્ષયેત્તદા રમ્ભામેનામપિ તથોર્વશીમ્ ॥ ૨૧૬॥

સઙ્ગ્રામસમયે વીરસ્તારાસામ્રાજ્યકીર્તનાત્ ।
ચતુરઙ્ગચયઞ્જિત્વા સર્વસામ્રાજ્યભાગ્ભવેત્ ॥ ૨૧૭॥

નિશાર્ધે પૂજનાન્તે ચ પ્રતિનામ્ના પ્રપૂજયેત્ ।
એકૈકકરવીરાદ્યૈર્મન્દૌર્નીલવારિજૈઃ ॥ ૨૧૮॥

ગદ્યપદ્યમયીવાણી ભૂભોજ્યા ચ પ્રવર્તતે ।
પાણ્ડિત્યં સર્વશાસ્ત્રેષુ વાદી ત્રસ્યતિ દર્શનાત્ ॥ ૨૧૯॥

વહ્નિજાયાન્તકૈરેતૈસ્તારાદ્યૈઃ પ્રતિનામભિઃ ।
રાજન્યં સર્વરાજેષુ પરકાયપ્રવેશનમ્ ॥ ૨૨૦॥

અન્તર્ધાનઙ્ખેચરત્વમ્બહુકાયપ્રકાશનમ્ ।
ગુટિકા પાદુકા પદ્માવતી મધુમતી તથા ॥ ૨૨૧॥

રસં રસાયનાઃ સર્વાઃ સિદ્ધયઃ સમુપસ્થિતાઃ ।
કર્પૂરાગરુકસ્તૂરીચન્દનૈઃ સંયુતૈર્જલૈઃ ॥ ૨૨૨॥

મૂલં સમ્પુટિતેનૈવ પ્રતિનામ્ના પ્રપૂજયેત્ ।
યક્ષરાક્ષસગન્ધર્વા વિદ્યાધરમહોરગાઃ ॥ ૨૨૩॥

ભૂતપ્રેતપિશાચાદ્યા ડાકિનીશાકિનીગણાઃ ।
દુષ્ટા ભૈરવવેતાલાઃ કૂષ્માણ્ડાઃ કિન્નરીગણાઃ ॥ ૨૨૪॥

ભયભીતાઃ પલાયન્તે તેજસા સાધકસ્ય ચ ।
મન્ત્રજ્ઞાને સમુત્પન્ને પ્રતિનામ્ના વિચારયેત્ ॥ ૨૨૫॥

મન્ત્રસમ્પુટિતેનૈવ તસ્ય શાન્તિર્ભવેદ્ધ્રુવમ્ ।
લલિતા વશમાયાતિ દાસ્યતાયાન્તિ પાર્થિવાઃ ॥ ૨૨૬॥

અગ્નયઃ શીતતાયાન્તિ જપાકસ્ય ચ ભાષણાત્ ।
એકાવર્તનમાત્રેણ રાજભીતિનિવારણમ્ ॥ ૨૨૭॥

વેલાવર્તનમાત્રેણ પશુવૃદ્ધિઃ પ્રજાયતે ।
દશાવૃત્યા ધનપ્રાપ્તિર્વિંશત્યા રાજ્યમાપ્નુયાત્ ॥ ૨૨૮॥

શતાવૃત્યા ગૃહે તસ્ય ચઞ્ચલા નિશ્ચલા ભવેત્ ।
ગઙ્ગાપ્રવાહવદ્વાણી પ્રલાપાદપિ જાયતે ॥ ૨૨૯॥

પુત્રપૌત્રાન્વિતો મન્ત્રી ચિરઞ્જીવી તુ દેવવત્ ।
શતદ્વયાવર્તનેન દેવવત્પૂજ્યતે જનૈઃ ॥ ૨૩૦॥

શતપઞ્ચકમાવર્ત્ય સ ભવેદ્ભૈરવોપમઃ ।
સહસ્રાવર્તનેનૈવ મન્ત્રસ્તસ્ય સ્વસિદ્ધિદઃ ॥ ૨૩૧॥

તસ્મિન્પ્રવર્તતે સર્વસિદ્ધિઃ સર્વાર્થસાધિની ।
પાદુકાઞ્ચનવેતાલાપાતાલગગનાદિકમ્ ॥ ૨૩૨॥

વિવિધા યક્ષિણીસિદ્ધિર્વાક્સિદ્ધિસ્તસ્ય જાયતે ।
શોષણં સાગરાણાઞ્ચ ધારાયા ભ્રમણન્તથા ॥ ૨૩૩॥

નવીનસૃષ્ટિનિર્માણં સર્વકર્તુર્ક્ષમો ભવેત્ ।
આયુતાવર્તનેનૈવ તારામ્પશ્યતિ ચક્ષુષા ॥ ૨૩૪॥

લક્ષાવર્તનમાત્રેણ તારાપતિસમો ભવેત્ ।
ન કિઞ્ચિદ્દુર્લભન્તસ્ય જીવન્મુક્તો હિ ભૂતલે ॥ ૨૩૫॥

કલ્પાન્તેન તુ તત્પશ્ચાત્તારાસાયુજ્યમાપ્નુયાત્ ।
યદ્ધિ તારાસમા વિદ્યા નાસ્તિ તારુણ્યરૂપિણી ॥ ૨૩૬॥

ન ચૈતત્સદૃશં સ્તોત્રમ્ભવેદ્બ્રહ્માણ્ડમણ્ડલે ।
વક્ત્રકોટિસહસ્રૈસ્તુ જિહ્વાકોટિશતૈરપિ ॥ ૨૩૭॥

ન શક્યતે ફલવક્તું મયા કલ્પશતૈરપિ ।
ચુમ્બકે નિન્દકે દુષ્ટે પિશુને જીવહિંસકે ॥ ૨૩૮॥

સઙ્ગોપ્યં સ્તોત્રમેતત્તદર્શનેનૈવ કુત્રચિત્ ।
રાજ્યન્દેયન્ધનન્દેયં શિરો દેયમથાપિ વા ॥ ૨૩૯॥

ન દેયં સ્તોત્રવર્યન્તુ મન્ત્રાદપિ મહોદ્યતમ્ ।
અનુલોમવિલોમાભ્યાં મૂલસમ્પુટિતન્ત્વિદમ્ ॥ ૨૪૦॥

લિખિત્વા ભૂર્જપત્રાદૌ ગન્ધાષ્ટકપુરસ્સરૈઃ ।
ધારયેદ્દક્ષિણે બાહૌ કણ્ઠે વામભુજે તથા ॥ ૨૪૧॥

તસ્ય સર્વાર્થસિદ્ધિસ્સ્યાદ્વહ્નિના નૈવ દહ્યતે ।
તદ્ગાત્રં શસ્ત્રસઙ્ઘૈશ્ચ ભિદ્યતે ન કદાચન ॥ ૨૪૨॥

સ ભૂમિવલયે પુત્ર વિચરેદ્ભૈરવોપમઃ ।
વન્ધ્યાપિ લભતે પુત્રન્નિર્ધનો ધનમાપ્નુયાત્ ॥

નિર્વિઘ્નો લભતે વિદ્યાન્તર્કવ્યાકરણાદિકામ્ ॥ ૨૪૩॥

ઇતિ નિગદિતમસ્યાસ્તાદિનામ્નાં સહસ્રં-
    વરદમનુનિદાનન્દિવ્યસામ્રાજ્યસઙ્ઘામ્ ।
વિધિહરિગિરિશાદૌ શક્તિદાનૈકદક્ષં
    સમવિધિપઠનીયઙ્કુલિતારાસમઙ્ગૈઃ ॥ ૨૪૪॥

ઇતિ શ્રીબ્રહ્મયામલે તારાયાસ્તકારાદિસહસ્રનામસ્તોત્ર સમ્પૂર્ણમ્ ॥

The original text is
from Muktabodha Indological Research Institute
www.muktabodha.org
Data-entered by the staff of Muktabodha under the direction of Mark S. G.
Dyczkowski.
Reprint of edition published in 1892.  Revision 0 february 9, 2009
Publisher : Shrivenkateshvara press Publication year : 1949

Reproofread by DPD

*Shri Tara Takaradi Sahasranamastotram*
pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*